# Shri Sharada Devi Suprabhatam

# શ્રીશારદાદેવીસુપ્રભાતમ્

## Document Information

Text title : Shri Sharada Devi Suprabhatam

File name : shAradAdevIsuprabhAtam.itx

Category : deities_misc, gurudev, rAmakRiShNa, suprabhAta

Location : doc_deities_misc

Author : Swami Achalanandasarasvati

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીશારદાદેવીસુપ્રભાતમ્

માતઃ સમસ્તજગતાં પરમસ્ય પુંસઃ
શક્તિસ્વરૂપિણિ શિવે કરુણાર્દ્રચિત્તે ।
લોકસ્ય શોકશમનાય કૃતાવતારે
શ્રીશારદેઽસ્તુ શિવદે તવ સુપ્રભાતમ્ ॥ ૧॥

બાલો ભવસ્ય તમસઃ પરિહારયિત્રે
લીલામનુષ્યવપુષેઽથ ગદાધરાય ।
દત્તે તદર્પિતધિયાઽમ્સસમસ્તવિદ્યે
શ્રીશારદેઽસ્તુ શુભદે તવ સુપ્રભાતમ્ ॥ ૨॥

બાલ્યાત્ પરે વયસિ ભર્તરિ સમ્પ્રવૃત્તા-
મુન્મત્ત ઇત્યનુચિતામવધૂય વાર્તામ્ ।
તદ્દર્શનક્રમિતદુર્ગમદૂરમાર્ગે
શ્રીરામકૃષ્ણ દયિતે તવ સુપ્રભાતમ્ ॥ ૩॥

સંન્યાસિતં પતિમવેક્ષ્ય ચ નોદ્વિજાને
સેવાર્પિતત્રિકરણે પરિશુદ્ધચિત્તે ।
તત્સાધનાચરમસીમ્નિ સમર્પિતાઙ્ઘ્રે
શ્રીરામકૃષ્ણ પરમેશ્વરિ સુપ્રભાતમ્ ॥ ૪॥

યામેવ ચાત્મજનનીં ભવતારિણીં ચ
સેવાપરાં તુ બુબુધે ગુરુરસ્તભેદઃ ।
તસ્યાઃ સમસ્તજગતોઽસ્ય શરણ્યમૂર્તેઃ
શ્રીરામકૃષ્ણ દયિતે તવ સુપ્રભાતમ્ ॥ ૫॥

આવૃણ્વતી પરમિકાં પ્રકૃતિં સ્વકીયાં
સંસારિણીવ બહુદુઃખજલે ભવાબ્ધૌ ।
સર્વં સહે શ્રિતજનોદ્ધરણૈકદીક્ષે
શ્રીરામકૃષ્ણદયિતે તવ સુપ્રભાતમ્ ॥ ૬॥

ગેહસ્ય માર્જનવિધૌ મમ કર્મશાન્તિં
    નાયાત્યસઙ્ખ્ય ભુજનિષ્ક્રિયમાણમેવમ્ ।
આકસ્મિકોક્તિવિવૃતાખિલશક્તિરૂપે
    શ્રીરામકૃષ્ણદયિતે તવ સુપ્રભાતમ્ ॥ ૭॥

શ્રીરામકૃષ્ણદયિતે ત્વદધીનસત્ત્વે
    ત્વદ્ભક્તવૃન્દપરિપાલિનિ મુક્તિદાત્રિ ।
ત્વદ્ભાવરક્તહૃદયે ત્વદભિન્નતત્ત્વે
    માતઃ સમસ્ત જગતાં તવ સુપ્રભાતમ્ ॥ ૮॥

ઇતિ સ્વામિઅચલાનન્દસરસ્વતીપ્રણીતં “શ્રીશ્રીશારદાદેવીસુપ્રભાતમ્” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Sharada Devi Suprabhatam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*